# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा – जुलाई - २०२१

| | | |
|---|---|---|
| कक्षा – आचार्य – १ | प्रश्नपत्रम् – ३ | गुणाः – ५० |
| विषयः – पुराणेतिहासः | सत्रम् – २ | समयः – २ तः ४ |
| दिनाङ्कः – १५/०७/२०२१ | सन्दर्भग्रन्थः – श्रीमद्भागवतमहापुराणम् एकादशस्कन्धः | |

**सूचना - निम्नलिखितेषु एकादशप्रश्नेषु केचन पञ्चप्रश्नाः विधेयाः।**
**प्रत्येकं प्रश्नस्य समानगुणाः। (१०)**

**प्रश्नः १ अधोलिखितेषु द्वयोः पद्ययोः व्याख्यां कुरुत।**

१ एवं प्रलब्धा मुनयः तानूचुः कुपिता नृप।
जयियिष्यति वो मन्दा मुसलं कुलनाशनम्॥

२ मुखबाहूरुपादेभ्यः पुरुषस्याश्रमैः सह।
चत्वारो जज्ञिरे वर्णा गुणैर्विप्रादयः पृथक्॥

३ विदन्ति मर्त्याः प्रायेण विषयान् पदमापदाम्।
तथापि भुञ्जते कृष्ण तत् कथं स्वस्वराजवत्॥

४ सर्वभूतेषु यः पश्येद् भगवद्भावमात्मनः।
भूतानि भगवत्यात्मन्येष भागवतोत्तमः॥

**प्रश्नः २** नवयोगेश्वराणां वचनामृतसारं यथाग्रन्थं सम्यक् लिखन्तु।

**प्रश्नः ३** भगवदवतारवर्णनं विस्तारेण सम्यक् लिखन्तु।

**प्रश्नः ४** दत्तात्रेयस्य पृथिवीतः आरभ्य मधुकृत् इत्यन्तं द्वादशगुरूणां सारं यथाग्रन्थं लिखत।

**प्रश्नः ५** बद्धमुक्तयोः साधूनां च लक्षणानि सद्भक्तिप्राप्त्युपायवर्णनं च कुर्वन्तु।

**प्रश्नः ६ अधोलिखितेषु द्वयोः पद्ययोः व्याख्या कार्या।**

१ जन्मौषधितपोमन्त्रैर्यावतीरिह सिद्धयः।
योगेनाप्नोति ताः सर्वाः नान्यैर्योगपतिं व्रजेत्॥

२ समुद्धरन्ति ये विप्रं सीदन्तं मत्परायणम्।
तानुद्धरिष्ये न चिरात् आपद्भ्यो नौरिवार्णवात्॥

३ कैवल्यं सात्त्विकं ज्ञानं रजो वैकल्पिकं च यत् ।
प्राकृतं तामसं ज्ञानं मन्निष्ठं निर्गुणं स्मृतम् ॥
४ दृष्टिपूतं न्यसेद् पादं वस्त्रपूतं पिबेज्जलम् ।
सत्यपूतां वदेद् वाचं मनःपूतं समाचरेत् ॥

**प्रश्नः ७** अष्टादशसिद्धिवर्णनं यथाग्रन्थं क्रियताम् ।

**प्रश्नः ८** भगवतो विभूतिवर्णनं यथाग्रन्थं क्रियताम् ।

**प्रश्नः ९** वर्णाश्रमधर्मनिरूपणं ग्रन्थानुसारं क्रियताम् ।

**प्रश्नः १०** यमनियमादीनां वर्णनं यथाग्रन्थं क्रियताम् ।

**प्रश्नः ११ दशानां प्रश्नानां लघूत्तराणि लिखत ।**

१ एकादशस्कन्धे का लीला ? कति चाध्यायाः ?
२ केषां शापः अभूत् ?
३ कति योगेश्वराः ?
४ दत्तात्रेयस्य कति गुरवः ?
५ बहूनां वासे किं भवति ?
६ आशा हि परमं दुःखमिति को वदति ?
७ मानुषो देहः कीदृशः ?
८ स्कन्धेऽस्मिन् मुख्यसंवादः कयोरस्ति ?
९ कस्य सर्वा दिशः सुखमया भवन्ति ?
१० मुख्यसिद्धयः कति सन्ति ?
११ भगवान् अक्षराणां किमस्ति ?
१२ कस्य देहः क्षुद्रकामाय नेष्यते ?
१३ को बन्धः ?
१४ तनोः कति अवस्थाः सन्ति ?
१५ विषयोत्थं सुखं कीदृशमस्ति ?

****